**संस्कृत-वार्ता:**

**दिनाङ्क :-10.09.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री सेमिकॉन्**

**प्रधानमन्त्री नरेन्द्र मोदी ग्रेटर नोएडायां इण्डिया एक्स्पो मार्ट् इत्यत्र, श्वः चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य सेमिकोन इण्डिया इत्यस्य उद्घाटनं करिष्यति। सः अस्मिन् अवसरे सभाम् अपि सम्बोधयिष्यति।**

**प्रधानमन्त्री-पद्मम्**

**प्रधानमन्त्री नरेन्द्रमोदी अधिकाधिकजनैः आग्रहं कृतवान् यत्**

**पद्मपुरस्काराय प्रेरणास्पदानां जनानां नामाङ्कनं कुर्वन्तु। नामाङ्कनस्य अन्तिमा तिथिः अस्य मासस्य पञ्चदश दिनाङ्कः अस्ति। सामाजिकसञ्जालीय एकस्मिन् संदेशे प्रधानमन्त्री अनेकानि नामाङ्कनानि प्राप्य प्रसन्नः अस्ति इति उक्तवान्। सः प्रकाशितवान् यत् विगतदशके सर्वकारेण जनपद्म-पुरस्कारेण असंख्यनिम्नस्तरीयनायका: पुरस्कृता: । सः अवदत् यत् पुरस्कारप्राप्त जनानाम् जीवनयात्रया बहुशः जनाः प्रेरिताः । ।नामाङ्कनानि अत्र awards.gov.in इत्यत्र प्रेषयंतु।**

**उत्तराखण्ड-शिलापातः**

**उत्तराखण्डस्य सोनप्रयाग-मुनकटियाक्षेत्रस्य भूस्खलनक्षेत्रे शिलापतनेन ह्यः सायं एकस्य जनस्य मृत्युः अभवत्, अन्ये द्वौ व्रणितौ जातौ। व्रणीतौ चिकित्सालये प्रेषितौ स्तः। दुर्घटनायाः दुःखदवार्तायाः अनन्तरं मुख्यमन्त्री पुष्करसिंह धामी शोकसंवेदनां प्रकटितवान्। सः अवदत् यत्, सूचनाप्राप्त्यानन्तरम् एव साहाय्योद्धारदलानि तत्र प्रेषितानि।**

**एम्स तमाल**

**अखिल भारतीय चिकित्सा विज्ञान संस्थानम् अद्य नवदिल्ल्यां एकस्य समर्पितस्य तमालनिवृत्तिचिकित्सालयस्य इत्यस्य आरम्भम् करिष्यति। भारते तमाल-उपयोगेन उत्पन्नस्य महत्त्वपूर्णं जनस्वास्थ्य-समाह्वानं निवारणाय एषः उपक्रमः उद्दिश्यते । टीसीसी-चिकित्सालयं राष्ट्रिय-औषध-निर्भरता-उपचार-केन्द्रस्य संस्थायाः गभीर-निद्रा-चिकित्सा-विभागस्य च प्रयासः अस्ति।**

**ऋतु विभागः**

**भारतस्य ऋतुविभागेन अद्य पूर्वमध्यप्रदेशे छत्तीस गढ़े च प्रचण्डवृष्टेः सम्भावना प्रकटिता अस्ति। नागालैण्ड्, मणिपुर, मिजोरम, त्रिपुरा राज्येषु च आगामिनो: दिनद्वयोः अति वृष्टिः भविष्यति। ऋतुविभागेन अद्य ओडिशायां, तेलङ्गानायां, दक्षिण आन्तरिक कर्नाटके, केरले, माहे इत्यत्र च प्रचण्डवृष्टेः अनुमानं प्रकटितम्।**

**सर्वोच्चन्यायालय:**

**सर्वोच्चन्यायालयेन ह्यः इलाहाबाद उच्चन्यायालयस्य आदेश: स्थगित: यस्मिन् उत्तरप्रदेशसर्वकारेण ऊनविंशत्यधिक द्विसहस्र तमे वर्षे सहायकशिक्षकपरीक्षायाः माध्यमेन चितानां एकोनसप्ततिः सहस्रं यावत् सहायकशिक्षकाणां संशोधितसूचीं निर्मातुम् उक्तं आसीत्।शीर्षन्यायालयेन सहायकशिक्षकाणाम् चयनसूच्याधारितं उच्चन्यायालयस्य निर्णयोपि स्थगितः यत् राज्याधिकारिभिः विंशत्यधिक द्विसहस्र तम वर्षस्य जूनमासे द्वाविंशत्यधिक द्विसहस्र तम वर्षस्य जनवरीमासे उत्तीर्णाः शिक्षकाः, येषु अष्टशतोत्तर षड्सहस्रम् अभ्यर्थिनः सम्मिलिताः आसन् । मुख्यन्यायाधीशस्य डी वाई चन्द्रचूडस्य न्यायाधीशस्य जे.बी.परदीवालायाः, मनोजमिश्रायाः च पीठेन पंजीकृत याचिकायां राज्यसर्वकाराय उत्तरप्रदेशबेसिकशिक्षामण्डलस्य सचिवं च समेत्य अन्येभ्यः च कृते सूचना प्रसारितास्ति। अस्य मासस्य त्रयोविंशतिः दिनाङ्कात् आरभ्य सप्ताहे वाद श्रवणं निश्चयं भविष्यति।**

**एशिया-चषक हॉकी-स्पर्धा**

**एशिया चषक्-हॉकी स्पर्धा मालिकायाम् गतसायं भारतेन द्वितीय क्रीडायां जापानदलं पञ्च-एकमिति अङ्कान्तरालेन पराजितम्। एषा स्पर्धा चीनदेशस्य हुलुनबुइर इत्यत्र क्रीडिता।**

**।।इति वार्ता:।।**